# RUDRA MAHANYASAM
## SRINGERI SHARADA PEETTHAM VERSION
Type set by: Sastry Sreepada

॥ ॐ नमः शिवाय ॥

॥ अथ महान्यास प्रयोगः ॥

॥ ॐ नमो भगवते रुद्राय ॥

ॐ अथातः पञ्चाङ्गरुद्राणाम् ॥

ॐकार मन्त्रसंयुक्तं नित्यं ध्यायन्ति योगिनः। कामदं मोक्षदं तस्मै नकाराय नमो नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ नं नमस्ते रुद्र मन्यव उतो त इषवे नमः। नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः। ॐ कं खं गं घं ङं। ॐ नमो भगवते रुद्राय। नं ॐ पूर्वाङ्ग–रुद्राय नमः॥ महादेवं महात्मानं महापातकनाशनम्। महापापहरं वन्दे मकाराय नमो नमः॥ ॐ भूर्भुवस्सुवः। ॐ मं निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिङ्गाय नमः। हिरण्याय नमः। हिरण्यलिङ्गाय नमः। सुवर्णाय नमः। सुवर्णलिङ्गाय नमः। दिव्याय नमः। दिव्यलिङ्गाय नमः। भवाय नमः। भवलिङ्गाय नमः। शर्वाय नमः। शर्वलिङ्गाय नमः। शिवाय नमः। शिवलिङ्गाय नमः। ज्वलाय नमः। ज्वललिङ्गाय नमः। आत्माय नमः।

आत्मलिङ्गाय नमः। परमाय नमः। परमलिङ्गाय नमः। एतत्सोमस्य सूर्यस्य सर्वलिङ्गग् स्थापयति पाणिमन्त्रं पवित्रम्। ॐ चं छं जं झं ञं ॐ नमो भगवते रुद्राय। मं ॐ दक्षिणाङ्गरुद्राय नमः॥ शिवं शान्तं जगन्नाथं लोकानुग्रहकारणम्। शिवमेकं परं वन्दे शिकाराय नमो नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ शिं अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु। पर्णं वनस्पते–रिवाभिनश्शीयताग् रयिः सचतां नः शचीपतिः॥ ॐ टं ठं डं ढं णं ॐ नमो भगवते रुद्राय। शिं ॐ पश्चिमाङ्गरुद्राय नमः॥ वाहनं वृषभो यस्य वासुकिः कण्ठभूषणम्। वामे शक्तिधरं वन्दे वकाराय नमो नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ वां प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः। तेनान्नेनाप्यायस्व॥ ॐ तं थं दं धं नं । ॐ नमो भगवते रुद्राय। वां ॐ उत्तराङ्गरुद्राय नमः॥ यत्र कुत्र स्थितं देवं सर्वव्यापिनमीश्वरम्। यल्लिङ्गं पूजयेन्नित्यं यकाराय नमो नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ यं यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु। ॐ पं फं बं भं मं ॐ नमो भगवते रुद्राय । यं ॐ ऊर्ध्वाङ्गरुद्राय नमः॥

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥

संवर्ताग्नि तटित्प्रदीप्तकनकप्रस्पर्धितेजोमयं
गम्भीरध्वनिमिश्रितोग्रदहनप्रोद्भासिताम्राधरम्।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः॥

ॐ अं कं खं गं घं ङं आं ॐ। ॐ नमो भगवते रुद्राय। ॐ नं पूर्वमुखाय
नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्वशर्वेभ्यो
नमस्ते अस्तु रुद्ररूपेभ्यः॥

कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्राङ्कुरम्।
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णसंचारगं
वन्दे दक्षिणमीश्वरस्य कुटिलभ्रूभङ्गरौद्रं मुखम्॥

ॐ इं चं छं जं झं ञं ईं ॐ । ॐ नमो भगवते रुद्राय। ॐ मं
दक्षिणमुखाय नमः॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः।

प्रालेयाचलचन्द्रकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यक्तमनङ्गदेहदहनज्वालावळीलोचनम्।
ब्रह्मेन्द्रादिमरुद्गणैस्स्तुतिपरैरभ्यर्चितं योगिभिः
वन्देऽहं सकलं कळङ्करहितं स्थाणोर्मुखं पश्चिमम्॥

ॐ उं टं ठं डं ढं णं ऊं ॐ । ॐ नमो भगवते रुद्राय। शिं ॐ
पश्चिममुखाय नमः॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय
नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः।

गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम्।
स्निग्धं बिम्बफलाधरप्रहसितं नीलालकालङ्कृतं
वन्दे पूर्णशशाङ्कमण्डलनिभं वक्त्रं हरस्योत्तरम्॥

ॐ ऐं तं थं दं धं नं ऐं ॐ । ॐ नमो भगवते रुद्राय। वां ॐ
उत्तरमुखाय नमः॥ ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

व्यक्ताव्यक्तगुणेतरं सुविमलं षट्त्रिंशतत्त्वात्मकं
तस्मादुत्तरतत्त्वमक्षरमिति ध्येयं सदा योगिभिः।
वन्दे तामसवर्जितं त्रिनयनं सूक्ष्मातिसूक्ष्मात्परं
शान्तं पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम्॥

ॐ ॐ पं फं बं भं मं औं ॐ। ॐ नमो भगवते रुद्राय। यं ॐ ऊर्ध्वमुखाय नमः॥ पूर्वे पशुपतिः पातु दक्षिणे पातु शङ्करः। पश्चिमे पातु विश्वेशो नीलकण्ठस्तथोत्तरे। ऐशान्यां पातु मां शर्वो ह्याग्नेय्यां पार्वतीपतिः। नैरृत्यां पातु मां रुद्रो वायव्यां नीललोहितः॥
ऊर्ध्वे त्रिलोचनः पातु अधरायां महेश्वरः। एताभ्यो दशदिग्भ्यस्तु सर्वतः पातु शङ्करः॥

या ते रुद्र शिवा तनूरघोराऽपापकाशिनी। तयानस्तनुवा शन्तमया गिरिशन्ताभि चाक–शीहि॥ शिखायै नमः॥ अस्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ शिरसे नमः ॥ सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ ललाटाय नमः॥ हग्ंसश्शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा

अद्रिजा ऋतं बृहत्॥ भ्रुवोर्मध्याय नमः॥ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्–मृत्योर्मुक्षीय माऽमृतात्॥ नेत्राभ्यां नमः॥ नमस्स्रुत्याय च पथ्याय च नमः काट्याय च नीप्याय च॥ कर्णाभ्यां नमः। मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः॥ वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते॥ नासिकाभ्यां नमः॥ अवतत्य धनुस्त्वग्ं सहस्राक्ष शतेषुधे। निशीर्य शल्यानां मुखा शिवो नस्सुमना भव॥ मुखाय नमः॥ नीलग्रीवाः शितिकण्ठाः शर्वा अधः क्षमाचराः। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ कण्ठाय नमः॥ नीलग्रीवा श्शितिकण्ठा दिवग्ं रुद्रा उपश्रिताः। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ उपकण्ठाय नमः॥ नमस्ते अस्त्वायुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥ बाहुभ्यां नमः॥ या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मान्, विश्वतस्त्वमयक्ष्मया परिब्भुज॥ उपबाहुभ्यां नमः॥ ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ हस्ताभ्यां नमः॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवेभवे नातिभवे भवस्व माम्॥ भवोद्भवाय नमः॥ अङ्गुष्ठाभ्यां नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय

नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ तर्जनीभ्यां नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। मध्यमाभ्यां नमः॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ अनामिकाभ्यां नमः॥ ईशानस्सर्व–विद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥ कनिष्ठिकाभ्यां नमः॥ नमो वः किरिकेभ्यो देवानागं हृदयेभ्यः॥ हृदयाय नमः॥ नमो गणेभ्यो गणपतिभ्यश्च वो नमः॥ पृष्ठाय नमः॥ नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः॥ कक्षाभ्यां नमः॥ नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः॥ पार्श्वाभ्यां नमः॥ विज्यं धनुः कपर्दिनो विशल्यो बाणवागं उत। अनेशन्नस्येषव आभुरस्य निषङ्गथिः॥ जठराय नमः॥ हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ नाभ्यै नमः॥ मीढुष्टम शिवतम शिवो नस्सुमना भव। परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि॥ कट्यै नमः॥ ये भूतानामधिपतयो

विशिखासः कपर्दिनः। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ गुह्याय नमः॥ ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान्। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ अण्डाभ्यां नमः॥ सशिरा जातवेदाः॥ अक्षरं परमं पदम्। वेदानाग्ं शिर उत्तमम्। जातवेदसे शिरसि माता। ब्रह्म भूर्भुवस्सुवरोम्॥ अपानाय नमः॥ मा नो महान्तमुत मानो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः॥ ऊरुभ्यां नमः॥ एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः॥ जानुभ्यां नमः॥ सग्ंसृष्टजित्सोमपा बाहु शर्ध्यूर्ध्वधन्वा प्रतिहताभिरस्ता। बृहस्पते परिदीया रथेन रक्षोहामित्राग्ं अपबाधमानः॥ जङ्घाभ्यां नमः॥ विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु॥ गुल्फाभ्यां नमः॥ ये पथां पथिरक्षय ऐलबृदा यव्युधः। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ पादाभ्यां नमः॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहीग्ंश्च सर्वाञ्जम्भ–यन्त्सर्वाश्च यातुधान्यः॥कवचाय नमः॥ नमो बिल्मिने च कवचिने च नमश्शृताय च श्रुतसेनाय च॥ उपकवचाय नमः॥ नमो अस्तु

नीलग्रीवाय सहस्राक्षाय मीढुषे। अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥ तृतीयनेत्राय नमः॥ प्रमुञ्च धन्वनस्त्व–मुभयोरार्त्नियोर्ज्याम्। याश्च ते हस्त इषवः परा ता भगवो वप॥ अस्त्राय फट्॥ य एतावन्तश्च भूयाग्ंसश्च दिशो रुद्रा वितस्थिरे। तेषाग्ं सहस्रयोजनेव धन्वानि तन्मसि॥ इति दिग्बधः ॥ ॐ नमो भगवते रुद्राय। ॐ मूर्ध्ने नमः। नं नासिकायै नमः। मों ललाटाय नमः। भं मुखाय नमः। गं कण्ठाय नमः। वं हृदयाय नमः। तें दक्षिणहस्ताय नमः। रुं वामहस्ताय नमः। द्रां नाभ्यै नमः। यं पादाभ्यां नमः॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥ पादाभ्यां नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलवि–करणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः॥ ऊरुमध्यमाभ्यां नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥हृदयाय नमः॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥मुखाय नमः॥ ईशानस्सर्व विद्यानामीश्वर–स्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे

अस्तु सदाशिवोम्॥मूर्ध्ने नमः॥

॥ अथ हंसगायत्री ॥

अस्य श्री हंसगायत्रीस्तोत्र महामन्त्रस्य। आत्मा ऋषिः। परमात्मा देवता।

अव्यक्तगायत्री–छन्दः। हंसगायत्रीजपे विनियोगः॥

हंसां अङ्गुष्ठाभ्यां नमः
हंसीं तर्जनीभ्यां नमः
हंसूं मध्यमाभ्यां नमः
हंसैं अनामिकाभ्यां नमः
हंसौं कनिष्ठिकाभ्यां नमः
हंसः करतल करपृष्ठाभ्यां नमः
हंसां हृदयाय नमः
हंसीं शिरसे स्वाहा
हंसूं शिखायै वषट्
हंसैं कवचाय हुं
हंसौंनेत्रत्रयाय वौषट्
हंसः अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः॥

॥ अथ ध्यानम् ॥

गमागमस्थं गगनादिशून्यं  चिद्रूपदीपं तिमिरापहारम्।
पश्यामि ते सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम्॥
हंसहंसः परमहंसस्सोऽहं हंसः सोऽहं हंसः॥
हंसहंसाय विद्महे परमहंसाय धीमहि। तन्नो हंसः प्रचोदयात्॥
हंसहंसेति यो ब्रूयात् हंसो नाम सदाशिवः।
एवं न्यासविधिं कृत्वा ततः सम्पुटमारभेत्॥

॥ अथ सम्पुटीकरणम् ॥
इंद्रादीन् दिक्षुविन्यस्य

ॐ भूर्भुवस्सुवः॥ ॐ ॐ त्रातारमिन्द्रमवितारमिन्द्रगं हवेहवे सुहवगं शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रगं स्वस्ति नो मघवा धात्विन्द्रः॥ ॐ नमो भगवते रुद्राय। ॐ ॐ पूर्वदिग्भागे इन्द्राय नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ नं त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषागं सि प्रमुमुग्ध्यस्मत्। ॐ नमो भगवते रुद्राय। नं ॐ आग्नेयदिग्भागे अग्नये

नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ मों सुगं नः पन्थामभयं कृणोतु। यस्मिन्नक्षत्रे यम ऐति राजा। यस्मिन्नेनमभ्यषिञ्चत देवाः। तदस्य चित्रगं हविषा यजाम। ॐ नमो भगवते रुद्राय। मों ॐ दक्षिणदिग्भागे यमाय नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ भं असुन्वन्तमयजमान–मिच्छस्तेनस्येत्यांन्तस्करस्यान्वेषि। अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु। ॐ नमो भगवते रुद्राय। भं ॐ निर्ऋतिदिग्भागे निर्ऋतये नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ गं तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरु शगं स मा न आयः प्रमोषीः। ॐ नमो भगवते रुद्राय। गं ॐ पश्चिमदिग्भागे वरुणाय नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ वं आ नो नियुद्भिश्शति–नीभिरध्वरम्। सहस्रिणीभिरुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व। यूयं पात स्वस्तिभिस्सदा नः॥ ॐ नमो भगवते रुद्राय। वं ॐ वायव्यदिग्भागे वायवे नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ तें वयगं सोम व्रते तव। मनस्तनूषु बिभ्रतः। प्रजावन्तो अशीमहि। इन्द्राणी देवी सुभगा सुपत्नी॥ ॐ नमो भगवते रुद्राय। तें ॐ उत्तरदिग्भागे कुबेराय नमः॥ ॐ भूर्भुवस्सुवः॥

ॐ रुं तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्स्वस्तये॥ ॐ नमो भगवते रुद्राय। रुं ॐ ईशान्यदिग्भागे ईशानाय नमः॥ ॐ भूर्भुवस्सुवः॥ ॐ द्रां अस्मे रुद्रामेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः। यश्शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः। ॐ नमो भगवते रुद्राय। द्रां ॐ ऊर्ध्वदिग्भागे आकाशाय नमः॥

ॐ भूर्भुवस्सुवः॥ ॐ यं स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नश्शर्म सप्रथाः। ॐ नमो भगवते रुद्राय। यं ॐ अधोदिग्भागे पृथिव्यै नमः॥

॥ अथ दशांगरौद्रीकरणम् ॥

ॐ भूर्भुवस्सुवः॥ ॐ ॐ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च।

त्रातारमिन्द्रमवितारमिन्द्रग्ं हवेहवे सुहवग्ं शूरमिन्द्रम्। हुवे नु शक्रं पुरुहूतमिन्द्रग्ं स्वस्ति नो मघवा धात्विन्द्रः॥ नमः शम्भवे च मयोभवे

च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। ॐ ॐ पूर्वदिग्भागे ललाटस्थाने इंद्राय नमः॥१॥

ॐ भूर्भुवस्सुवः॥ ॐ नं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडोऽवयासिसीष्ठाः। यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाग्ं सि प्रमुमुग्ध्यस्मत्॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय नं ॐ आग्नेयदिग्भागे नेत्रस्थाने अग्नये नमः॥२॥

ॐ भूर्भुवस्सुवः॥ ॐ मों नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। सुगं नः पन्थामभयं कृणोतु। यस्मिन्नक्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिञ्चत देवाः। तदस्य चित्रग्ं हविषा यजाम॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय । मों ॐ दक्षिणदिग्भागे कर्णस्थाने यमाय नमः॥३॥

ॐ भूर्भुवस्सुवः॥ ॐ भं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च।

असुन्वन्तमयजमानमिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि। अन्यमस्मदिच्छ सात इत्या नमो देवि निर्ऋते तुभ्यमस्तु॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। भं ॐ निर्ऋतिदिग्भागे मुखस्थाने निर् ऋतये नमः॥४॥

ॐ भूर्भुवस्सुवः॥ ॐ गं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरु शग्ं स मा न आयुः प्रमोषीः॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय गं ॐ पश्चिमदिग्भागे बाहुस्थाने वरुणाय नमः॥५॥

ॐ भूर्भुवस्सुवः॥ ॐ वं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। आ नो नियुद्भिश्शतिनीभिरध्वरम्। सहस्रीणीभिरुपयाहि यज्ञम्। वायो अस्मिन् हविषि मादयस्व। यूयं पात स्वस्तिभिस्सदा नः॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। वं ॐ वायव्यदिग्भागे नासिकास्थाने वायवे

नमः।६।

ॐ भूर्भुवस्सुवः॥ ॐ तें नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। वयग्ं सोम व्रते तव। मनस्तनूषु बिभ्रतः। प्रजावन्तो अ शीमहि। इन्द्राणी देवी सुभगा सुपत्नी॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय । तें ॐ उत्तरदिग्भागे जठरस्थाने कुबेराय नमः॥७॥ ॐ भूर्भुवस्सुवः॥ ॐ रुं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धस्स्वस्तये॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। रुं ॐ ईशान्यदिग्भागे नाभिस्थाने ईशानाय नमः॥८॥ ॐ भूर्भुवस्सुवः॥ ॐ द्रां नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अस्मे रुद्रामेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः। यश्शंसतेस्तुवते धायि पज्र इन्द्रज्येष्ठा अस्माँ अवन्तु देवाः॥ नमः शम्भवे च मयोभवे च नमः

शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। द्रां ॐ ऊर्ध्वदिग्भागे मूर्ध्नि स्थाने आकाशाय नमः॥९॥ ॐ भूर्भुवस्सुवः॥ ॐ यं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। स्योना पृथिवि भवानृक्षरा निवेशनी। यच्छा नश्शर्म सप्रथाः॥ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ नमो भगवते रुद्राय। यं ॐ अधोदिग्भागे पादस्थाने पृथिव्यै नमः॥ १० ॥

॥ अथ षोडशांगरौद्रीकरणम् ॥

ॐ भूर्भुवस्सुवः॥ ॐ अं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय अं ॐ [ भूर्भुवस्सुवरोम् ] शिखास्थाने

रुद्राय नमः॥१॥ ॐ भूर्भुवस्सुवः॥ ॐ आं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय आं ॐ [भूर्भुवस्सुवरोम् } शिरःस्थाने रुद्राय नमः॥२॥ ॐ भूर्भुवस्सुवः॥ ॐ इं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। श्रात्रोऽसि प्रचेता रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय इं ॐ [ भूर्भुवस्सुवरोम् ] मूर्ध्निस्थाने रुद्राय नमः॥३॥ ॐ भूर्भुवस्सुवः॥ ॐ ईं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। तुथोऽसि विश्ववेदा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः। [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय ईं ॐ [भूर्भुवस्सुवरोम् ] ललाटस्थाने रुद्राय

नमः॥४॥ ॐ भूर्भुवस्सुवः॥ ॐ उं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। उशिगसि कवी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय उं ॐ [भूर्भुवस्सुवरोम् ] नेत्रस्थाने रुद्राय नमः॥५॥ ॐ भूर्भुवस्सुवः॥ ॐ ऊं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अङ्घारिरसि बम्भारी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः। [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय ऊं ॐ [ भूर्भुवस्सुवरोम् ] कर्णस्थाने रुद्राय नमः॥६॥ ॐ भूर्भुवस्सुवः॥ ॐ ऋं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अवस्युरसि दुवस्वान्रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ ऋं ॐ [ भूर्भुवस्सुवरोम् ] मुखःस्थाने रुद्राय नमः॥७॥ ॐ भूर्भुवस्सुवः॥

ॐ ॠं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहि माऽग्ने पिपृहिमा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ ॠं ॐ [ भूर्भुवस्सुवरोम् ] कण्ठस्थाने रुद्राय नमः ॥८॥ ॐ भूर्भुवस्सुवः॥ ॐ लुं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। सम्राडसि कृशानू रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ लुं ॐ [ भूर्भुवस्सुवरोम् ] बाहुस्थाने रुद्राय नमः॥ ९ ॥ ॐ भूर्भुवस्सुवः॥ ॐ लूं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। परिषद्योऽसि पवमानो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय। लूं ॐ [ भूर्भुवस्सुवरोम् ] हृदयस्थाने रुद्राय नमः॥१०॥ ॐ भूर्भुवस्सुवः॥

ॐ ऐं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। प्रतक्वासि नभस्वान्रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिगं्सीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ ऐं ॐ [ भूर्भुवस्सुवरोम् ] नाभिस्थाने रुद्राय नमः॥११॥ ॐ भूर्भुवस्सुवः॥ ॐ ऐं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। असमृंष्टोऽसि हव्यसूदो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिगं्सीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ ऐं ॐ [ भूर्भुवस्सुवरोम् ] कटिस्थाने रुद्राय नमः॥१२॥ ॐ भूर्भुवस्सुवः॥ ॐ ॐ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ऋतधामाऽसि सुवर्ज्योती रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिगं्सीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ]ॐ नमो भगवते रुद्राय॥ ॐ ॐ [ भूर्भुवस्सुवरोम् ]ऊरुस्थाने रुद्राय

नमः॥१३॥ ॐ भूर्भुवस्सुवः॥ ॐ औं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ औं ॐ [ भूर्भुवस्सुवरोम् ] जानुस्थाने रुद्राय नमः॥१४॥ ॐ भूर्भुवस्सुवः॥ ॐ अं नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अजोऽस्येक–पाद्रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ अं ॐ [ भूर्भुवस्सुवरोम् ] जङ्घास्थाने रुद्राय नमः॥१५॥ ॐ भूर्भुवस्सुवः॥ ॐ अः नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। अहिरसि बुध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिग्ंसीः॥ [ नमः शम्भवे च मयोभवे च नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ] ॐ नमो भगवते रुद्राय॥ अः ॐ [ भूर्भुवस्सुवरोम् ]

पादस्थाने रुद्राय नमः॥१६॥

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते। सर्वभूतेष्वपराजितो भवति। ततो भूतप्रेतपिशाचब्रह्म–राक्षसयक्ष–यमदूत–शाकिनी–डाकिनी–सर्प–श्वापद–तस्कर–ज्वराद्युपद्रवजोपघाताः सर्वे ज्वलन्तं पश्यन्तु मां रक्षन्तु सह–कुटुम्बं रक्षन्तु यजमानगं रक्षन्तु सर्वान् महाजनान् रक्षन्तु॥

॥ अथ आत्मरक्षा ॥

मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञगं समिमं दधातु।
बृहस्पतिस्तनुतामिमं नो विश्वेदेवा इह मादयन्ताम्॥ गुह्याय नमः॥
अबोध्यग्निः समिधा जनानां प्रति धेनुमिवा–यतीमुषासम्। यह्वा इव
प्रवयामुज्जिहानाः प्रभानवः स्सिस्रते नाकमच्छ॥ नाभ्यै नमः॥
अग्निमूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपागं रेतागंसि जिन्वति॥
हृदयाय नमः॥ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृताय जातमग्निम्।
कविगं संराजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः॥ कण्ठाय नमः॥
मर्माणि ते वर्मभिश्छादयामि सोम–स्त्वाराजामृतेनाभिवस्ताम्।
उरोर्वरीयो वरिवस्ते अस्तु जयन्तं त्वामनुमदन्तु देवाः। मुखाय नमः॥

जातवेदा यदि वा पावकोऽसि। वैश्वानरो यदि वा वैद्युतोऽसि। शं प्रजाभ्यो यजमानाय लोकम्। ऊर्जं पुष्टिं ददद्भ्याववृत्स्व॥ शिरसे नमः॥

ब्रह्मात्मन्वदसृजत। तदकामयत। समात्मना पद्येयेति। आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै दशमग्ं हूतः प्रत्यशृणोत्। स दशहूतोऽभवत्॥ दशहूतो ह वै नामैषः। तं वा ऐतं दशहूतग्ं सन्तम्॥ दशहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥ आत्मन्ना-त्मन्नित्यामन्त्रयत। तस्मै सप्तमग्ं हूतः प्रत्यशृणोत्। ससप्तहूतोऽभवत्। सप्तहूतो ह वै नामैषः। तं वा ऐतग्ं सप्तहूतग्ं सन्तम्। सप्तहोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै षष्ठग्ं हूतः प्रत्यशृणोत्। स षड्ढूतोऽभवत्। षड्ढूतो हवै नामैषः। तं वा ऐतग्ं षड्ढूतग्ं सन्तम्। षड्ढोतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः॥ आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै पञ्चमग्ं हूतः प्रत्यशृणोत्। स पञ्चहूतोऽभवत्। पञ्चहूतो ह वै नामैषः। तं वा ऐतं पञ्चहूतग्ं सन्तम्। पञ्च-होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। आत्मन्नात्मन्नित्यामन्त्रयत। तस्मै चतुर्थग्ं हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो ह वै नामैषः। तं वा ऐतं चतुर्हूतग्ं सन्तम्।

चतुर्होतेत्याचक्षते परोक्षेण। परोक्षप्रिया इव हि देवाः। तमब्रवीत्। त्वं वै मे नेदिष्ठग्ं हूतः प्रत्यश्रौषीः। त्वयैनानाख्यातार इति। तस्मान्नु हैनाग्ं श्चतुर्होतार इत्याचक्षते। तस्माच्छुश्रूषुः पुत्राणाग्ं हृद्यतमः। नेदिष्ठो हृद्यतमः। नेदिष्ठो ब्रह्मणो भवति। य एवं वेद। इत्यात्मरक्षा॥

॥ अथ शिवसङ्कल्पम् ॥

येनेदं भूतं भुवनं भविष्यत्परिगृहीतममृतेन सर्वम्। येन यज्ञस्त्रायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु॥१॥ येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति। यत्सम्मितं मनः सचरन्ति तन्मे मनः शिवसङ्कल्पमस्तु॥२॥ येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति वितथेषु धीराः। यदपूर्वं यक्षमन्तं प्रजानां तन्मे मनः शिव-सङ्कल्पमस्तु॥३॥ यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु। यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु॥४॥ सुषारथिरश्वानि वयं मनुष्यान्मे नियुते पशुभिर्वाजिनीवान्। हृत्प्रविष्टं यदचरं यविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु॥५॥ यस्मिन्नृचसामायजूग्ंषि यस्मिन्प्रतिष्ठा रशना भा

विभाराः। यस्मिग्ग्ंश्चित्तग्ं सर्वमोतं प्रजानां तन्मे मनः
शिवसङ्कल्पमस्तु॥६॥ यदत्र षष्ठं त्रिशतग्ं सुवीर्यं यज्ञस्य गुह्यं
नवनाव–माय्यम्। दश पञ्च त्रिग्ं शतं यत्परं तन्मे मनः
शिवसङ्कल्पमस्तु॥७॥ यज्जाग्रतो दूरमुदैतु सर्वं तत्सुप्तस्य तथैवेति।
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिव–सङ्कल्पमस्तु॥८॥ येनेदं
विश्वं जगतो बभूव ये देवापिमहसो जातवेदाः।
तदेवा–ग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमास्तन्मे मनः
शिवसङ्कल्पमस्तु॥९॥ येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो
दिशश्च। येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिव–सङ्कल्पमस्तु॥१०॥
ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः। ते श्रोत्रे चक्षुषी
सञ्चरन्तं तन्मे मनः शिवसङ्कल्पमस्तु॥११॥ अचिन्त्यं चाप्रमेयं च
व्यक्ता–व्यक्तपरं च यत्। सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः
शिवसङ्कल्पमस्तु॥१२॥ ऐका च दश च शतं च सहस्रं चायुतं च। नियुतं
च प्रयुतं चार्बुदं च न्यर्बुदं च तन्मे मनः शिवसङ्कल्पमस्तु॥१३॥ ये पञ्च
पञ्चादश शतग्ं सहस्रमयुतं न्यर्बुदं च। ते अग्नि–चित्तेष्टकास्ताग्ं शरीरं
तन्मे मनः शिवसङ्कल्पमस्तु॥१४॥ वेदाहमेतं पुरुषं महान्त–मादित्यवर्णं

तमसः परस्तात्। यस्य योनिं परिपश्यन्ति धीरास्तन्मे मनः
शिव-सङ्कल्पमस्तु॥१५॥ यस्यैतं धीराः पुनन्ति कवयो ब्रह्माणमेतं
त्वावृणतमिन्दुम्। स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः
शिवसङ्कल्पमस्तु॥१६॥ परात्परतरं ब्रह्म तत्परात्परतो हरिः।
यत्परात्परतोऽधीशं तन्मे मनः शिवसङ्कल्पमस्तु॥१७॥ परात्परतरं चैव
तत्पराच्चैव यत्परम्। यत्परात्परतो ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु॥१८॥
या वेदादिषु गायत्री सर्वव्यापी महेश्वरी। ऋग्यजुस्सामाथर्वैश्च तन्मे मनः
शिवसङ्कल्पमस्तु॥१९॥ यो वै देवं महादेवं प्रयतः प्रणवः शुचिः। यस्सर्वे
सर्ववेदैश्च तन्मे मनः शिवसङ्कल्पमस्तु॥२०॥ प्रयतः प्रणवोङ्कारं प्रणवं
पुरुषोत्तमम्। ॐकारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु ॥२१॥
योऽसौ सर्वेषु वेदेषु पठ्यते ह्ययमीश्वरः। अकायो निर्गुणो ह्यात्मा तन्मे मनः
शिवसङ्कल्पमस्तु॥२२॥ गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च। प्रजया
पशुभिः पुष्कराक्षं तन्मे मनः शिवसङ्कल्पमस्तु॥२३॥ त्र्यम्बकं यजामहे
सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्तन्मे
मनः शिवसङ्कल्पमस्तु॥२४॥ कैलास-शिखरे रम्ये शंकरस्य शिवालये।
देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥२५॥

कैलासशिखरावासा हिमवद्गिरिसंस्थितम्। नीलकण्ठं त्रिणेत्रं च तन्मे
मनः शिवसङ्कल्पमस्तु॥२६॥ विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त
उत विश्वतस्पात्। सम्बाहुभ्यां नमति संपतत्रैर्द्यावापृथिवी जनयन्देव
ऐकस्तन्मे मनः शिवसङ्कल्पमस्तु ॥२७॥ चतुरो वेदानधीयीत
सर्वशास्त्रमयं विदुः। इतिहासपुराणानां तन्मे मनः
शिव–सङ्कल्पमस्तु॥२८॥ मा नो महान्तमुत मा नो अर्भकं मा न
उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं प्रिया मा
नस्तनुवो रुद्र रीरिषस्तन्मे मनः शिव–सङ्कल्पमस्तु॥२९॥ मा नस्तोके
तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मानो रुद्र
भामितो वधीर्हविष्मन्तो नमसा विधेम ते तन्मे मनः
शिव–सङ्कल्पमस्तु॥३०॥ ऋतग्ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमस्तन्मे मनः
शिवसङ्कल्पमस्तु॥३१॥ कद्रुद्राय प्रचेतसे मीढुष्ट–माय तव्यसे। वोचेम
शन्तमग्ं हृदे। सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु तन्मे मनः
शिवसङ्कल्पमस्तु॥३२॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन
आवः। स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवस्तन्मे

मनः शिवसङ्कल्पमस्तु ॥३३॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपद–श्चतुष्पदः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु॥३४॥ य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु॥३५॥ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु तन्मे मनः शिव–सङ्कल्पमस्तु॥३६॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियं तन्मे मनः शिवसङ्कल्पमस्तु॥३७॥ नमकं चमकं चैव पुरुषसूक्तं च यद्विदुः। महादेवं च तत्तुल्यं तन्मे मनः शिवसङ्कल्पमस्तु॥३८॥ य इदगं शिव–संकल्पगं सदा ध्यायन्ति ब्राह्मणाः। ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्प–मस्तु॥३९॥ ॐ नमो भगवते रुद्राय। शिवसङ्कल्पगं हृदयाय नमः॥

॥ पुरुषसूक्तं ॥

सहस्रशीर्षा पुरुषः। सहस्राक्षः सहस्रपात्। स भूमिं विश्वतो वृत्वा।
अत्यतिष्ठद्दशाङ्गु–लम्। पुरुष ऐवेदग्ं सर्वम्। यद्भूतं यच्च भव्यम्।
उतामृतत्त्वस्येशानः। यदन्ने–नातिरोहति। ऐतावानस्य महिमा। अतो
ज्यायाग्ंश्च पूरुषः॥१॥ पादोऽस्य विश्वा भूतानि। त्रिपादस्यामृतं दिवि।
त्रिपादूर्ध्व उदैत्पुरुषः। पादोऽस्येहाभवात्पुनः। ततो विष्वङ्व्यक्रा–मत्।
साशनानशने अभि। तस्माद्विराडजायत। विराजो अधि पूरुषः। स जातो
अत्य–रिच्यत। पश्चाद्भूमिमथो पुरः॥२॥ यत्पुरुषेण हविषा। देवा
यज्ञमतन्वत। वसन्तो अस्या–ऽऽसीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः।
सप्तास्यासन्परिधयः। त्रिस्सप्त समिधः कृताः। देवा यद्यज्ञं तन्वानाः।
अबध्नन्पुरुषं पशुम्। तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं जात–मग्रतः॥३॥ तेन
देवा अयजन्त। साध्या ऋषयश्च ये। तस्माद्यज्ञात्सर्वहुतः। सम्भृतं
पृषदाज्यम्। पशूग्ंस्ताग्ंश्चक्रे वायव्यान्। आरण्यान्ग्राम्याश्च ये।
तस्माद्यज्ञात्सर्वहुतः। ऋचस्सामानि जज्ञिरे। छंदाग्ंसि जज्ञिरे तस्मात्।
यजुस्तस्मादजायत॥४॥ तस्मादश्वा अजायन्त। ये के चोभयादतः। गावो
ह जज्ञिरे तस्मात्। तस्माज्जाता अजावयः। यत्पुरुषं व्यदधुः। कतिधा

व्यकल्पयन्। मुखं किमस्य कौ बाहू। कावूरू पादावुच्येते। ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः॥५॥ ऊरू तदस्य यद्वैश्यः। पद्भ्यागं शूद्रो अजायत। चन्द्रमा मनसो जातः। चक्षोः सूर्यो अजायत। मुखादिन्द्रश्चाग्निश्च। प्राणाद्वायुरजायत। नाभ्या आसीदन्तरिक्षम्। शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्। तथा लोकागं अकल्पयन्॥६॥ वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः। नामानि कृत्वाऽभिवदन् यदास्ते। धाता पुरस्ताद्यमुदाजहार। शक्रः प्रविद्वान्प्रदिशश्चतस्रः। तमेवं विद्वानमृत इह भवति। नान्यः पन्था अयनाय विद्यते। यज्ञेन यज्ञमयजन्त देवाः। तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्ते। यत्र पूर्वे साध्याः सन्ति देवाः॥७॥ ॐ नमो भगवते रुद्राय। पुरुषसूक्तगं शिरसे स्वाहा ॥

॥ उत्तरनारायणं ॥

अद्भ्यः संभूतः पृथिव्यै रसाच्च। विश्वकर्मणः समवर्तताधि। तस्य त्वष्टा विदध-द्रूपमेति। तत्पुरुषस्य विश्वमाजानमग्रे। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं तमसः परस्तात्। तमेवं विद्वानमृत इह भवति। नान्यः पन्था विद्यतेऽयनाय। प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा विजायते॥८॥ तस्य धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति वेधसः। यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः। नमो रुचाय ब्राह्मये। रुचं ब्राह्मं जनयन्तः। देवा अग्रे तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात्। तस्य देवा असन्वशे॥९॥ ह्रीश्च ते लक्ष्मीश्च पत्न्यौ। अहोरात्रे पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तम्। इष्टं मनिषाण। अमुं मनिषाण। सर्वं मनिषाण॥१०॥ ॐ नमो भगवते रुद्राय।

उत्तरनारायणग्ं शिखायै वषट् ॥

॥ अप्रतिरथं कवचम् ॥

आशुश्शिशानो वृषभो न युध्मो घनाघनः, क्षोभणश्चर्षणीनाम्।
सक्रंन्दनोऽनिमिष एक- वीरः शतग्ं सेना अजयत्साकमिन्द्रः।
सक्रंन्दनेनानिमिषेण जिष्णुना युत्कारेण दुश्च्य-वनेन धृष्णुना। तदिन्द्रेण
जयत तत्सहध्वं युधो नर इषुहस्तेन वृष्णा। स इषुहस्तैस्स
निषङ्गिभिर्वशी सग्ग्ंस्रष्टासयुध इन्द्रो गणेन। सग्ग्ंसृष्टजित्सोमपा
बाहुशर्ध्यूर्ध्वधन्वा-प्रतिहिताभिरस्ता। बृहस्पते परिदीया रथेन
रक्षोहामित्राग्ं अपबाधमानः। प्रभञ्जन्त्सेनाः प्रमृणो युधा
जयन्नस्माकमेध्यविता रथानाम्। गोत्रभिदं गोविदं वज्रबाहुं जयन्तमज्म
प्रमृणन्तमोजसा। इमग्ं सजाता अनुवीरयध्वमिन्द्रग्ं सखायोऽनु सग्ं
रभध्वम्। बल-विज्ञायस्स्थविरः प्रवीरस्सहस्वान् वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्। अभि
गोत्राणि सहसा गाहमानो दायो वीरश्शत-मन्युरिन्द्रः। दुश्च्यवनः
पृतनाषाडयुध्योऽस्माकग्ं सेना अवतु प्रयुथ्सु। इन्द्र आसां नेता
बृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः। देवसेनानामभिभञ्जतीनां
जयन्तीनां मरुतो यन्त्वग्रे। इन्द्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां

मरुताग्ं शर्द्ध उग्रम्। महामनसां भुवनच्यवानां घोषो देवानां
जयतामुदस्थात्। अस्माकमिन्द्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता
जयन्तु। अस्माकं वीरा उत्तरे भवन्त्वस्मानु देवा अवता हवेषु। उद्धर्षय
मघवन्नायुधान्युत्सत्वनां मामकानां महाग्ंसि। उद्वृत्रहन्वाजिनां
वाजिनान्युद्रथानां जय–तामेतु घोषः। उपप्रेत जयता नरस्थिसरावस्सन्तु
बाहवः। इन्द्रो वः शर्म यच्छत्वनाधृष्या यथासथ। अवसृष्टा परापत शरव्यो
ब्रह्मसग्ंशिता। गच्छामित्रान्प्रविश मैषां कञ्च–नोच्छिषः। मर्माणि ते
वर्मभिश्छादयामि सोमस्त्वा राजाऽमृतेनाभिवस्ताम्। उरोर्वरीयो वरिवस्ते
अस्तु जयन्तं त्वामनुमदन्तु देवाः। यत्र बाणास्सम्पतन्ति कुमारा विशिखा
इव। इन्द्रो नस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥
असुरानजयन्तदप्रतिरथस्याप्रतिरथत्वं यदप्रतिरथं द्वितीयो होतान्वाहा
प्रत्येव तेन यजमानो भ्रातृव्याञ्जयत्यथो अनभिजित–मेवाभिजयति
दशर्चं भवति दशाक्षरा विराड्विराजेमौ लोकौ
विधृतावनयोर्लोक–योर्विधृत्या अथो दशाक्षरा विराडन्नं विराड्विराज्ये
वान्नाद्ये प्रतितिष्ठत्यसदिव वा अन्तरिक्षमन्तरिक्षमिवाग्नीध्रमाग्नीध्रे॥ ॐ
नमो भगवते रुद्राय। आशुश्शिशानोऽप्रतिरथं कवचाय हुम्॥

## ॥ प्रतिपूरुषमित्यनुवाकः ॥

प्रतिपूरुषमेककपालान्निर्वपत्येकमतिरिक्तं यावन्तो गृह्यास्स्मस्तेभ्यः
कमकरं पशूनागं शर्मासि शर्म यजमानस्य शर्म मे यच्छैक एव रुद्रो
न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागस्सह
स्वस्राऽम्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं
भेषजगं सुभेषजं यथाऽसति। सुगं मेषाय मेष्या अवाम्ब रुद्रमदिमह्यव
देवं त्र्यम्बकम्। यथा नः श्रेयसः करद्यथा नो वस्यसः करद्यथा नः
पशुमतः करद्यथा नो व्यवसाययात्। त्र्यम्बकं यजामहे सुगन्धिं
पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय माऽमृतात्। ऐष ते रुद्र
भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः
कृत्तिवासाः॥ प्रतिपूरुषमेककपालान्निर्व–पति। जाता ऐव प्रजा
रुद्रान्निरवदयते। ऐकमतिरिक्तम्। जनिष्यमाणा ऐव प्रजा रुद्रा–न्निरवदयते।
ऐक कपाला भवन्ति। ऐकधैव रुद्रं निरवदयते। नाभिघारयति।
यदभि–घारयेत्। अन्तरवचारिणगं रुद्रङ्कुर्यात्। ऐकोल्मुकेन यन्ति। तद्धि
रुद्रस्य भागधेयम्। इमां दिशं यन्ति। ऐषा वै रुद्रस्य दिक्। स्वायामेव दिशि

रुद्रं निरवदयते। रुद्रो वा अप–शुकाया आहुत्यै नातिष्ठत। असौ ते
पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न
द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्। न ग्राम्यान्पशून् हिनस्ति। नारण्यान्।
चतुष्पथे जुहोति। ऐष वा अग्नीनां पड्बीशो नाम। अग्निवत्येव जुहोति।
मध्यमेन पर्णेन जुहोति। स्रुग्घ्येषा। अथो खलु। अन्तमेनैव होतव्यम्।
अन्तत एव रुद्रं निरवदयते। ऐष ते रुद्र भागस्सह स्वस्राऽम्बिकयेत्याह।
शरद्वा अस्याम्बिका स्वसा। तया वा ऐष हिनस्ति। यग्ं हिनस्ति। तयैवैन
सह शमयति। भेषजं गव इत्याह। यावन्त ऐव ग्राम्याः पशवः। तेभ्यो
भेषजं करोति। अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामाशास्ते।
त्र्यम्बकं यजामह इत्याह। मृत्योर्मुक्षीय माऽमृतादिति वावैतदाह।
उत्किरन्ति। भगस्य लीप्सन्तो। मूते कृत्वाऽऽसजन्ति। यथाजनं यतेऽवसं
करोति। तादृगेव तत्। ऐष ते रुद्र भाग इत्याह निरवत्त्यै। अप्रतीक्षमायन्ति।
अपः परिषिञ्चति। रुद्रस्यान्तर्हित्यै। प्र वा एतेऽस्माल्लोकाच्च्यवन्ते। ये
त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः।
अस्यामेव प्रतितिष्ठन्ति॥ विभ्राड्भृहत्पिबतु सोम्यं
मध्वायुर्दधद्यज्ञपतावविह्रुतम्। वातजूतो यो अभिरक्षति त्मना प्रजाः

पुपोष पुरुधा विराजति॥ ॐ नमो भगवते रुद्राय। पतिपूरुषं प्रतिपूरुषं विभ्राडिति नेत्रत्रयाय वौषट्॥

॥ त्वमग्ने रुद्रोऽनुवाकः ॥

त्वमग्ने रुद्रो असुरो महो दिवस्त्वग्ं शर्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि शङ्गयस्त्वं पूषा विधतः पासि नु त्मना। आ वो राजानमध्वरस्य रुद्रग्ं होतारग्ं सत्य–यजग्ं रोदस्योः। अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम्। अग्निर्होता निषसादायजीयानुपस्थे मातुः सुरभावु लोके। युवा कविः पुरुनिष्ठः ऋतावा धर्ता–कृष्टीनामुतमध्य इद्धः। साध्वीमकर्देववीतिंनो अद्य यज्ञस्य जिह्वामविदाम गुह्याम्। स आयुरागात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य। अक्रन्ददग्निः स्तनयन्निव द्यौः, क्षामा रेरिहद्वीरुधः समञ्जन्न्। सद्यो जज्ञानो विहीमिद्धो अख्यदा रोदसी भानुना भात्यन्तः। त्वे वसूनि पुर्वणीक होतर्दोषावस्तो रेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्थ्सग्ं सौभगानि दधिरे पावके। तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे। अश्याम तं काममग्ने

तवोत्यश्याम रयिगं रयिवः स्सुवीरम्। अश्याम वाजमभिवाजयन्तो–श्यामद्युम्नमजरा जरन्तो। श्रेष्ठं यविष्ठ भारताग्ने द्युमन्त–माभर। वसो पुरुस्पृह रयिम्। स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरूणि पृथून्यग्निरनुयाति भर्वन्न्। आयुष्टे विश्वतो दधदयमग्निर्व–रेण्यः। पुनस्ते प्राण आयति परा यक्ष्मगं सुवामि ते। आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम्। तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्। दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान ऐनं जरते स्वाधीः। शुचिः पावक वन्द्योऽग्ने बृहद्विरोचसे। त्वं घृतेभिराहुतः। दृशानो रुक्म उर्व्या व्यद्यौद्दुर्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः। आयदिषे नृपतिं तेज आनट्छुचिरेतो निषिक्तं द्यौरभीके। अग्निश्शर्धमनवद्यं युवानगं स्वाधियं जयनत्सूदयच्च। स तेजीयसा मनसा त्वोत उत शिक्षस्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टतयश्च वस्वः। अग्ने सहन्तमाभर द्युम्नस्य प्रासहारयिम्। विश्वायश्चर्षणीरभ्यासा वाजेषु

सासहत्। तमग्ने पृतनासहग्ं रयिग्ं सहस्व आभर। त्वग्ं हि सत्यो
अद्भुतो दाता वाजस्य गोमतः। उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे।
स्तोमैर्विधेमाग्नये। वद्माहि सूनो अस्यद्म सद्मा चक्रे
अग्निर्जनु–षाज्मान्नम्। सत्वं न ऊर्जसन ऊर्जं धा राजेवजेरवृके
क्षेष्यन्तः। अग्न आयूग्ंषि पवस आ सुवोर्जमिषं च नः। आरे बाधस्व
दुच्छुनाम्। अग्ने पवस्व स्वपा अस्मे वर्चस्सु–वीर्यम्। दधत्पोषग्ं रयिं
मयि। अग्ने पावक रोचिषा मन्द्रया देवजिह्वया। आ देवान् वक्षि यक्षि च।
स नः पावक दीदिवोऽग्ने देवाग्ं इहावह। उप यज्ञग्ं हविश्च नः। अग्निः
शुचिव्रततमः शुचिर्विप्रः शुचिः कविः। शुची रोचत आहुतः। उदग्ने
शुचयस्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीग्ंष्यर्चयः॥ त्वमग्ने रुद्रो
असुरो महो दिवः। त्वग्ं शर्द्धो मारुतं पृक्ष ईशिषे। त्वं वातैररुणैर्यासि
शङ्गयः। त्वं पूषा विधतः पासि नुत्मना। देवा देवेषु श्रयध्वम्। प्रथमा
द्वितीयेषु श्रयध्वम्। द्वितीयास्तृतीयेषु श्रय–ध्वम्। तृतीयाश्चतुर्थेषु श्रयध्वम्।
चतुर्थाः पञ्चमेषु श्रयध्वम्। पञ्चमाः षष्ठेषु श्रयध्वम्। षष्ठाः सप्तमेषु
श्रयध्वम्। सप्तमा अष्टमेषु श्रयध्वम्। अष्टमा नवमेषु श्रयध्वम्। नवमा
दशमेषु श्रयध्वम्। दशमा ऐकादशेषु श्रयध्वम्। ऐकादशा द्वादशेषु

श्रयध्वम्। द्वादशा–स्त्रयोदशेषु श्रयध्वम्। त्रयोदशाश्चतुर्दशेषु श्रयध्वम्।
चतुर्दशाः पञ्चदशेषु श्रयध्वम्। पञ्चदशाः षोडशेषु श्रयध्वम्।
षोडशास्सप्तदशेषु श्रयध्वम्। सप्तदशा अष्टादशेषु श्रयध्वम्। अष्टादशा
ऐकान्नविगंशेषु श्रयध्वम्। ऐकान्नविगंशा विगंशेषु श्रयध्वम्। विगंशा
ऐकविगंशेषु श्रयध्वम्। ऐकविगंशा द्वाविगंशेषु श्रयध्वम्।
द्वाविगंशास्त्रयो–विगंशेषु श्रयध्वम्। त्रयोविगंशाश्चतुर्विगंशेषु श्रयध्वम्।
चतुर्विगंशाः पञ्चविगंशेषु श्रयध्वम्। पञ्चविगंशाष्षड्विगंशेषु
श्रयध्वम्। षड्विगंशास्सप्तविगंशेषु श्रयध्वम्। सप्तविगंशा
अष्टाविगंशेषु श्रयध्वम्। अष्टाविगंशा ऐकान्नत्रिगंशेषु श्रयध्वम्।
ऐकान्न–त्रिगंशास्त्रिग्
ंशेषु श्रयध्वम्। त्रिगंशा ऐकत्रिगंशेषु श्रयध्वम्। ऐकत्रिगंशा द्वात्रिगंशेषु
श्रयध्वम्। द्वात्रिगंशास्त्रयस्त्रिगंशेषु श्रयध्वम्।
देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिगंशाः। उत्तरे भवत। उत्तर वर्त्मान
उत्तरसत्त्वानः। यत्काम इदं जुहोमि। तन्मे समृद्ध्यताम्। वयग्गंस्याम
पतयो रयीणाम्। भूर्भुवस्वस्स्वाहा। ॐ नमो भगवते रुद्राय। त्वमग्ने
त्वमग्ने शतरुद्रीयमित्यस्त्राय फट्॥

॥ अथ पञ्चाङ्ग जपः ॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः। भवेभवे नातिभवे भवस्व माम्। भवोद्भवाय नमः॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्व–भूतदमनाय नमो मनोन्मनाय नमः॥ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य–स्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ ईशानस्सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपति–र्ब्रह्मा शिवो मे अस्तु सदाशिवोम्॥

## ॥ अथ साष्टाङ्गनमस्कारः ॥

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ उरसा नमः॥१॥ यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ शिरसा नमः॥२॥ ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतस्सुरुचो वेन आवः। स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः॥ दृष्ट्या नमः॥३॥ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥ मनसा नमः॥४॥ उपश्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो अपसेध शत्रून्॥ वचसा नमः॥५॥ अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम॥ पद्भ्यां नमः॥६॥ या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा या ते अग्नेऽयाशया रजाशया हराशया तनूर्वषिष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीगं स्वाहा॥ कराभ्यां नमः॥७॥ इमं यमप्रस्तरमाहि सीदाङ्गिरोभिः पितृभिः संविदानः। आ त्वा मन्त्राः कविशस्ताव– हन्त्वेना

राजन्, हविषा मादयस्व॥ कर्णाभ्यां नमः॥८॥
[उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टांग उच्यते॥]

॥ अथ लघुन्यासः ॥

अथात्मान शिवात्मान श्रीरुद्ररूपं ध्यायेत्॥

ध्यानम्

शुद्धस्फटिकसङ्काशं त्रिनेत्रं पञ्चवक्त्रकं दशभुज सर्वाभरणभूषितम्। नीलग्रीव शशाङ्कचिह्नं नागयज्ञोपवीतिनं नागाभरणभूषितं व्याघ्रचर्मोत्तरीयकं कमण्डल्वक्षसूत्र–धरमभयवरकर शूलहस्तं ज्वलन्तं कपिलजटिन शिखामुद्योतधारिणम्। वृषस्कन्ध–समारूढमुमादेहार्धधारिणम्। अमृतेनाप्लुतं हृष्टं दिव्यभोगसमन्वितम्। दिग्देवता–समायुक्तं सुरासुरनमस्कृतम्। नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम्। सर्वव्यापि–नमीशानं रुद्रं वै विश्वरूपिणम्॥ प्रजनने ब्रह्मा तिष्ठतु। पादयोर्विष्णुस्तिष्ठतु। हस्तयोर्हरस्तिष्ठतु। बाह्वोरिन्द्रस्तिष्ठतु। जठरे अग्निस्तिष्ठतु। हृदये शिवस्तिष्ठतु। कण्ठे वसवस्तिष्ठन्तु। वक्त्रे सरस्वती तिष्ठतु। नासिकयोर्वायुस्तिष्ठतु। नयनयोश्चन्द्रादित्यौ तिष्ठे–ताम्। कर्णयोरश्विनौ

तिष्ठेताम्। ललाटे रुद्रास्तिष्ठन्तु। मूर्ध्न्यादित्यास्तिष्ठन्तु। शिरसि महा-देवस्तिष्ठतु। शिखायां वामदेवस्तिष्ठतु। पृष्ठे पिनाकी तिष्ठतु। पुरतः शूली तिष्ठतु। पार्श्वयो-श्शिवाशङ्करौ तिष्ठेताम्। सर्वतो वायुस्तिष्ठतु। ततो बहिस्सर्वतोऽग्निज्वालामालापरिवृता-स्तिष्ठन्तु। सर्वेष्वङ्गेषु सर्वा देवता यथास्थानं तिष्ठन्तु। मा रक्षन्तु यजमान रक्षन्तु॥

अग्निर्मे वाचि श्रितः। वाग्घृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। वायुर्मे प्राणे श्रितः। प्राणो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ सूर्यो मे चक्षुषि श्रितः। चक्षुर्हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। चन्द्रमा मे मनसि श्रितः। मनो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ दिशो मे श्रोत्रे श्रिताः। श्रोत्र हृदये । हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। आपो मे रेतसि श्रिताः। रेतो हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पृथिवी मे शरीरे श्रिता। शरीर हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। ओषधिवनस्पतयो मे लोमसु श्रिताः। लोमानि हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। इन्द्रो मे बले श्रितः। बल हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि। पर्जन्यो मे मूर्ध्नि श्रितः। मूर्धा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ ईश्शानो मे मन्यौ श्रितः। मन्युर् हृदये। हृदयं मयि। अहममृते। अमृतं

ब्रह्मणि॥ आत्मा म आत्मनि श्रितः। आत्मा हृदये। हृदयं मयि। अहममृते। अमृतं ब्रह्मणि॥ पुनर्म आत्मा पुनरायुरागात्। पुनः प्राणः पुनराकूतमागात्। वैश्वानरो रश्मिभिर्वावृधानः। अन्तस्तिष्ठत्वमृतस्य गोपाः॥ एवं यथालिङ्गमङ्गानि संमृज्य। अथैनं गन्धपुष्पाक्षतधूपदीपनैवेद्यताम्बूलैरभ्यर्च्यात्मानं प्रत्याराधयेत्। आराधितो मनुष्यै–स्त्वं सिद्धैर्देवासुरादिभिः। आराधयामि भक्त्या त्वां मां गृहाण महेश्वर॥ आत्वा वहन्तु हरयस्सचेतसश्श्वेतैरश्वैस्सह केतुमद्भिः। वाताजिरैर्बलवद्भिर्मनोजवैरायाहि॥ शीघ्रं मम हव्याय शर्वोम्। ईशानमावाहयामीत्यावाह्य॥ मण्डलान्तरगतं हिरण्मयं भ्राजमानवपुषं शुचिस्मितम्। चण्डदीधितिमखण्डविग्रहं चिन्तयेन्मुनिसहस्रसेवितम्। शङ्करस्य चरितं कथामृतं चन्द्रशेखरगुणानुकीर्तनम्। नीलकण्ठ तव पादसेवनं सम्भवन्तु मम जन्म–जन्मनि॥ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु॥ देहो देवालयः प्रोक्तो जीवो देवस्सनातनः। त्यजेदज्ञाननिर्माल्यं सोऽहं–भावेन पूजयेत्॥ आवाहितो भव। स्थापितो भव। सम्मुखो भव। सन्निहितो भव। सन्निरुद्धो भव। अवकुण्ठितो भव। प्रसीद प्रसीद॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः॥ श्रीभवानीशङ्कराभ्यां नमः नवरत्न–खचितसिंहासनं समर्पयामि॥ भवेभवे नातिभवे भवस्वमाम्। भवोद्भवाय नमः॥ श्री भवानीशङ्कराभ्यां नमः अर्घ्यं समर्पयामि॥ वामदेवाय नमः। श्रीभवानीशङ्कराभ्यां नमः स्नानं समर्पयामि॥ ज्येष्ठाय नमः। श्रीभवानीशङ्कराभ्यां नमः वस्त्रं समर्पयामि॥ श्रेष्ठाय नमः। श्रीभवानीशङ्कराभ्यां नमः उपवीतं समर्पयामि॥ रुद्राय नमः। श्रीभवानीशङ्कराभ्यां नमः आभरणानि समर्पयामि॥ कालाय नमः। श्रीभवानीशङ्कराभ्यां नमः गन्धं समर्पयामि॥ कलविकरणाय नमः। श्री भवानीशङ्कराभ्यांनमः तिलाक्षतान् समर्पयामि॥ बलविकरणाय नमः। श्रीभवानीशङ्कराभ्यां नमः पुष्पाणि समर्पयामि॥ बलाय नमः। श्री भवानीशङ्कराभ्यां नमः धूपमाघ्रापयामि॥ बलप्रमथनाय नमः। श्रीभवानीशङ्कराभ्यां नमः दीपं दर्शयामि॥ सर्वभूतदमनाय नमः। श्रीभवानीशङ्कराभ्यां नमः नैवेद्यं समर्पयामि॥ मनोन्मनाय नमः। श्रीभवानीशङ्कराभ्यां नमः ताम्बूलं समर्पयामि॥ अघोरेभ्योऽथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः।

श्रीभवानीशङ्कराभ्यां नमः उत्तर नीराजनं समर्पयामि॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्। श्रीभवानीशङ्कराभ्यां नमः मन्त्रपुष्पं समर्पयामि॥ ईशानस्सर्वविद्यानामीश्वर–स्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम्। श्री भवानी–शङ्कराभ्यां नमः प्रदक्षिणनमस्कारान् समर्पयामि॥ भवाय देवाय नमः। अर्कपुष्पं पूज–यामि॥ शर्वाय देवाय नमः। चम्पकपुष्पं पूजयामि॥ ईशानाय देवाय नमः। पुन्नागपुष्पं पूजयामि॥ पशुपतये देवाय नमः। नन्द्यावर्तपुष्पं पूजयामि॥ रुद्राय देवाय नमः। पाटलपुष्पं पूजयामि॥ उग्राय देवाय नमः। बृहतीपुष्पं पूजयामि॥ भीमाय देवाय नमः। करवीरपुष्पं पूजयामि॥ महते देवाय नमः। द्रोणपुष्पं पूजयामि॥ भवस्य देवस्य पत्न्यै नमः। अर्कपुष्पं पूजयामि॥ शर्वस्य देवस्य पत्न्यै नमः। चम्पकपुष्पं पूजयामि॥ ईशानस्य देवस्य पत्न्यै नमः। पुन्नागपुष्पं पूजयामि॥ पशुपतेर्देवस्य पत्न्यै नमः। नन्द्यावर्तपुष्पं पूजयामि॥ रुद्रस्य देवस्य पत्न्यै नमः। पाटलपुष्पं पूजयामि॥ उग्रस्य देवस्य पत्न्यै नमः। बृहतीपुष्पं पूजयामि॥ भीमस्य देवस्य पत्न्यै नमः। करवीरपुष्पं पूजयामि॥ महतो देवस्य पत्न्यै नमः। द्रोणपुष्पं पूजयामि॥

भवं देवं तर्पयामि। शर्वं देवं तर्पयामि। ईशानं देवं तर्पयामि। पशुपतिं देवं तर्पयामि। रुद्रं देवं तर्पयामि। उग्रं देवं तर्पयामि। भीमं देवं तर्पयामि। महान्तं देवं तर्पयामि। भवस्य देवस्य पत्नीस्तर्पयामि। शर्वस्य देवस्य पत्नीस्तर्पयामि। ईशानस्य देवस्य पत्नीस्तर्पयामि। पशुपतेर्देवस्य पत्नीस्तर्पयामि। रुद्रस्य देवस्य पत्नीस्तर्पयामि। उग्रस्य देवस्य पत्नीस्तर्पयामि। भीमस्य देवस्य पत्नीस्तर्पयामि। महतो देवस्य पत्नीस्तर्पयामि॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः। तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥ आशास्तेऽयं यजमानो–ऽसौ। आयुराशास्ते। सुप्रजास्त्वमाशास्ते। सजातवनस्यामाशास्ते। उत्तरां देवयज्यामा–शास्ते। भूयो हविष्करणमाशास्ते। दिव्यन्धामाशास्ते। विश्वं प्रियमाशास्ते। यदनेन हविषाऽऽशास्ते। तदश्यात्तदृद्ध्यात्। तदस्मै देवा रासन्ताम्। तदग्निर्देवो देवेभ्यो वनते। वयमग्नेर्मानुषाः। इष्टं च वीतं च। उभे च नो द्यावापृथिवी अहसस्पाताम्। इह गतिर्वामस्येदं च। नमो देवेभ्यः॥

उत्तरतः चण्डीश्वराय नमः निर्माल्यं विसृज्य॥ अथैतस्य मूर्ध्नि हिरण्यकलशोदकेन सन्ततधारा अभिषिञ्चन् पयसा सर्पिषा दध्ना मधुना चेक्षुरसेनाम्ररसेन नारिकेलसलिलेन पुष्पोदकेन फलोदकेन गन्धोदकेन

कुशोदकेन च तदभावे शुद्धोदकेन वा तत्तन्मन्त्रेणाभिषिच्य॥

बिल्वार्चन

त्रिदळं त्रिगुणाकारं त्रिणेत्रं च त्रियायुधम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैश्शुभैः ।
तव पूजां करिष्यामि एकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ।
अघोरपापसंहारमेकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

काशीक्षेत्रनिवासं च कालभैरवदर्शनम् ।
प्रयागे माधवं दृष्ट्वा एकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

तुलसी बिल्वनिर्गुंडीजंबीरामलकं तथा ।

पंचबिल्वमिति ख्यातमेकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

तटाकं धननिक्षेपं ब्रह्मस्थाप्यं शिवालयम् ।
कोटिकन्यामहादानमेकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

दंत्यश्वकोटिदानानि अश्वमेधशतानि च ।
कोटिविप्रान्नदानं च एकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

सालग्रामसहस्राणि विप्रान्नं शतकोटिकम् ।
यज्ञकोटिसहस्राणि एकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

अज्ञानेन कृतं पापं ज्ञानेनापि कृतं च यत् ।
तत्सर्वं नाशमायातु एकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

एकैकबिल्वपत्रेण कोटियज्ञफलं लभेत् ।
महादेवस्य पूजार्थमेकबिल्वं शिवार्पणम् ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

अमृतोद्भववृक्षस्य महादेवप्रियस्य च ।
मुच्यंते कंटकाघातात्कंटकेभ्यो हि मानवाः ॥
महादेवादिभ्यो नमः । बिल्वदळमर्पयामि ॥

॥ स्वस्ति श्रीबिल्वपूजां समर्पयामि ॥

॥ धूपं, दीपं, नैवेद्यं च कुर्यात् ॥